क्रं- १८ संस्कृत पूर्ण

कोजागिरी पूजा ६५ श्लोक.

" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai."

(1)

॥श्रीगणेशाय नमः॥ अथ कोजागर पूजाप्रारंभः॥ हरिः ॐ रमू॥ आचम्य प्राणानायम्य देश
कालौ संकीर्त्य मम इह जन्मनि जन्मांतरे च लक्ष्मी प्रीतिद्वारा सर्वोपशांति पूर्वकं दीर्घायुर्वि
पुल धन धान्य पुत्र पौत्राद्यविच्छिन्न संतति वृद्धि स्थिर लक्ष्मी कीर्तिलाभ शत्रुपराजय स
दाभीष्ट सिध्यर्थं आश्विन शुक्ल पौर्णिमास्यां विहितं कोजागर व्रतांगत्वेन प्रतिवार्षिकी
लक्ष्मी पूजां करिष्ये॥ तदंगं कलशार्चनं शंखार्चनं न्यासं च करिष्ये॥ आसनादि करिष्ये॥
पृथ्वीमा मेरुपृष्ठ ऋषिः कूर्मो देवता सुतलं छंदः॥ आसने विनियोगः॥ पृथ्वीत्वं० समारभे।
तीक्ष्ण दंष्ट्र० कृसि॥ हिरण्यवर्णामिति पंचदशर्चस्य सूक्तस्य श्रियः पुत्रा आनंद कर्दम चि
क्लीता ऋषयः॥ श्रीर्देवता॥ अनुष्टुप् छंदः॥ चतुर्थी प्रस्तार पंक्तिः॥ पंचमी षष्ठौ त्रिष्टुभौ॥
अंत्या बृहती॥ अलक्ष्मी परिहारार्थे श्रीसूक्तन्यासे विनियोगः॥ ॐ हिरण्यवर्णां० मू
र्धेनमः॥ तांम आवह० नेत्राभ्यां० अश्वपूर्वां० कर्णाभ्यां० कांसोस्मितां० नासिकायै०
चंद्रांप्रभासां० मुखाय० आदित्यवर्णे० कंठाय० उपैतुमां दे० बाहुभ्यां० क्षुत्पिपासा० हृद
या० गंधद्वारां० नाभ्यै० मनसः काममा० गुह्ये० कर्दमेन० अपानाय० आपः सृजंतु० ऊरुभ्यां०

(2)

कोजा॰प॰ आर्द्रां यः करिणीं॰ जानुभ्यां॰ आर्द्रां पुष्करिणीं॰ जंघाभ्यां॰ तां म आवह॰ पादाभ्यां॰ हिरण्यवर्णां॰
२ अंगुष्ठाभ्यां॰ तां म आवह॰ तर्जनीभ्यां॰ अश्वपूर्वां॰ मध्यमाभ्यां॰ कांसोस्मितां॰ अनामिकाभ्यां॰
चंद्रां प्रभासां॰ कनिष्ठिकाभ्यां॰ आदित्यवर्णे॰ करतलकरपृष्ठाभ्यां॰ उपैतु मां॰ हृदयेन॰ क्षु
त्पिपासा॰ शिरसे॰ गंधद्वारां॰ शिखायै॰ मनसः काममा॰ कवचाय॰ कर्दमेन प्र॰ नेत्रत्रया
य वौ॰ आपः सृजंतु॰ अस्त्राय फट्॰ आर्द्रां यः क॰ आर्द्रां पुष्करिणीं॰ आभ्यां सर्वांगेभ्यापकं।
तां म आवह॰ इति दिग्बंधः। कलशस्येति कलशपूजनं। शंखपूजनं। अपवित्रपवि॰
अथ द्वारपूजां कुर्यात्॥ गं गणपतये॰ क्षं क्षेत्रपालाय॰ पादुकाभ्यां॰ बटुकभैरवाय॰
आग्नये॰ जयायै॰ विजयायै॰ जयंत्यै॰ अपराजितायै॰ दक्षिणे। चेतनायै॰ बुध्यैन॰
निद्रायै॰ क्षुधायै॰ निर्ऋतये॰ शक्त्यै॰ तृष्णायै॰ क्षांत्यै॰ जात्यै॰ लज्जायै॰ पश्चिमे॥ शां समू
त्यै॰ श्रद्धायै॰ कीर्त्यै॰ लक्ष्म्यै॰ धृत्यै॰ प्रीत्यै॰ वायव्यदले स्मृत्यै॰ दयायै॰ तुष्ट्यै॰ मात्रेन॰
उदीच्ये। छायायै॰ शांत्यै॰ तृष्णायै॰ श्रद्धायै॰ ईशान्ये। क्षुधायै॰ निद्रायै॰ स्यायैन॰ १
स्मृत्यै॥ पीठमध्यभागे॥ कूर्मा॰ आधारशक्त्यै॰ शेषाय॰ पृथिव्यै॰ सलिलाय॰ पद्म

(2A)

नाभाय·॥अष्टदले॥ब्राह्म्येन·हंसवाहिन्यै·माहेश्वर्यै·वृषभारूढाय·कौमार्यै·मयूरवाहना॰
वैष्णव्यै·गारुडवाहनायै·वाराह्यै·दंष्ट्रोध्धृतवसुंधरायै·नारसिंह्यै·ऐंद्र्यै·गजारूढायै·स्कंद
गणेशयुतायै·चामुंडायै·मन्मथनायै·कर्णिकायांमध्ये॥ब्राह्म्यै·नंदजायै·हेमगर्भायै·
सुरक्तायै·रक्तदंतिकायै·शाकंभर्यै·नीलपत्रशिरोधर्यै·तेजोमंडलदुर्धर्षायै·आर्चितायै·
महाकाल्यै·महालक्ष्म्यै·महासरस्वत्यै·मध्ये महालक्ष्म्यै·॥इतिपीठपूजनं॥अथध्यानं॥
पाशापद्मासनरूढा॰॥क्षीरसागरसंभूतां क्षीरवर्णसमप्रभां॥क्षीरवर्णसमंवस्त्रंद
धानांहरिवल्लभां॥ध्यायामि॥ब्रह्महंससमारूढांधारिण्यक्षकमंडलुं॥विष्णुतेजो
धिकादेवींसामांपातुसरस्वती॥हिरण्यवर्णां·॥आवाहनं॥महेश्वरीमहादेवीआसनं
तेददाम्यहं॥महेश्वर्यसमायुक्ते ब्रह्माणी ब्राह्मणप्रिये॥तांमआवह·॥आसनं॥कु
मारशक्तिसंपन्ना॥कौमारीशिखिवाहना॥पाद्यंददामि महादेवीवरदेववरलक्षणे।
अन्नपूर्णा·॥पाद्यं·॥तीर्थोदकैर्महादिव्यैःपापसंहारकारकैः॥अर्घ्यंगृहाणभो
देवीदेवानामुपकारिणी॥कांसोस्मितां॰॥अर्घ्यं·॥वैष्णवीविष्णुसंयुक्ताअसंख्या

Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

नानामंत्रैः समुद्भूतं काचनं भक्तिवत्सले उपवीतं गृहाणेदं लोकानुग्रहकारणं यज्ञोपवीतं० पीनतनुसुरश्रेष्ठ
रत्नकोशसमुद्भवे मुंचमुक्तावलिर्युक्तां कंचुकीं प्रतिगृह्यतां कंचुकी० आचमनीयं० २

कोजागर युधधारिणी॥ आचम्यतां देवपूज्ये देवीरसुरमर्दनी॥ चंद्रप्रभासां०॥ आचमनीयं०॥ अरु
२ द्रिसवर्णे०॥ मलस्नानं॥ पयोदधिघृतं चैव मधुशर्करयान्वितं॥ पंचामृतेन स्नपनं क्रियतां परमेश्वरी॥ आप्यायस्व० दधि०॥ घृतं मि०॥ मधुवा०॥ स्वादुःप वस्व०॥ पंचामृतस्नानं॥ शुद्धो
दकैः स्नपयिष्ये॥ गंगाजलं समानीतं सुगंधद्रव्यसंयुतं॥ स्नानार्थं तिमयादत्तं गृहाण
(3) परमेश्वरी॥ स्नानं॥ पंचामृतैः शुद्धैः स्नापयिष्ये हरिप्रिये॥ वरदे शक्तिसंपन्ने वरदे श्री
वरप्रिये॥ शुद्धोदकस्नानं० वस्त्रं चंदनं अ॰ पु॰ धू॰ दीपं नैवेद्यं तांबूलं दक्षिणां मंत्रपु॰
अनेन पंचामृतपूजनेन भगवान्महालक्ष्मीः प्रीयतां अथ पुरुषसूक्तेन श्रीसूक्तेन महा
भिषेकः स्नानानंतरं आचमनं० रजताद्रिसमं दिव्यं क्षीरसागरसन्निभं चंद्रप्रभास
मं दिव्यं वस्त्रं ते प्रददाम्यहं उपैतुमां वस्त्रं मांगल्यमणिसंयुक्तं मुक्ताफलसमन्वितं दत्तं
मंगलसूत्रं ते गृहाण सुरवल्लभे कंठसूत्रं० सुवर्णभूषणं दिव्यं नानारत्नसुशोभितं त्रै रामू
लोक्यभूषिते देवि गृहाणाभरणं शुभं क्षुत्पिपासा० आभरणं स॰ रक्तगंधसुगंधा २
ढ्यं अष्टगंधसमन्वितं सौभाग्यद्रव्यसंयुक्तं गृहाण परमेश्वरी गंधद्वारां० गंधं हरिद्रां०

सुगंधतैलसंयुक्तंकोमलंमासनप्रियं शंकरस्यप्रियेगौरीकज्जलंप्रतिगृह्यतां कज्जलं० ताडपत्रेशुभंदिव्यंनानामणिविराजि
तं कर्णशोभाकरंश्वेवासतीप्रतिगृह्यतां कर्णविभूषणार्थेताडपत्रं०

कुंकुमं० कज्जलं० सौभाग्यद्रव्यं० अहिरिवभोगै० परिमलं० नानाविधानिपुष्पाणीनानावर्णयुतानि
च॥ पुष्पाणितेप्रयच्छामिसिंधत्याद्देविवरप्रदे मनसःकाममाकुतिं० पुष्पाणिस० अथांगपूजा
(3A) वरदलक्ष्म्यैनमः पादौपू० कमलवासिन्यै० गुल्फौपू० पद्मालयायै० जंघेपू० श्रियैन० जानुनीपू०
इंदिरायै० उरूंपू० हरिप्रियायै० नाभिंपू० लोकधात्र्यै० स्तनौपू० विधात्र्यै० कंठंपू० धात्र्यै० ना
सांपू० सरस्वत्यै० मुखंपू० पद्मनिध्यै० नेत्रेपू० लाक्ष्म्यै० कर्णौपू० क्षीरसागरायै० ललाटंपू०
श्रीवरदलक्ष्म्यै० शिरःपू० श्रीमहालक्ष्म्यै० सर्वांगंपू० ॥ अथावरणपूजा॥ जगन्मातायै०
महालक्ष्म्यै० शिवप्रियायै० शुभायै० शांतायै० सिद्धायै० सरस्वत्यै० क्षमायै० कांत्यै० प्रभायै०
ज्योत्स्नायै० पावन्यै० सर्वमांगल्यै० ॥ अभीष्टसिद्धिंमेदेहि शरणागतवत्सले॥ भक्त्यास
मर्पयेतुभ्यंप्रथमावरणार्चनं १ हिंगुलायै० चंडिकायै० शांतायै० पद्मायै० लक्ष्म्यै० हरिप्रिया
यै० त्रिपुरमर्दिन्यै० नंदिन्यै० सुनंदायै० सुरवंदितायै० महामायायै० वेदमातायै० सुधायै०
धृत्यै० प्रीत्यै० प्रियायै० प्रसिद्धायै० मृडायै० अभीष्टसि० २ विंध्यवासिन्यै० हिमाचलवा
सिन्यै० विद्यायै० पृथिव्यै० नारदसेवितायै० पुरुहूतायै० प्रियायै० कांत्यै० कामिन्यैनमः॥

Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

कोजागर पद्मलोचनायै·प्रल्हादिन्यै·महामातायै·दुर्गायै·ज्वालामुख्यै·सुनेत्रायै·अभीष्टसि· ३
२ कुमुद्वासिन्यै·दुर्गायै·दुर्लभायै·विद्यायै·स्वाविन्यै·पुरवासिन्यै·शांबर्यै·मायायै·
मंदिरायै·मृडुहासिन्यै·नारायण्यै·महानिद्रायै·योगनिद्रायै·प्रभाविन्यै·अभीष्ट· ४
(५) कालरात्र्यै·महारात्र्यै·महाकाल्यै·कुलेश्वर्यै·प्रज्ञापरमितायै·तारायै·मधुमंजिन्यै·
मधुवर्ष्यै·तुलजायै·वाम्नायै·माहेश्वर्यै·क्षीरार्णवसुतायै·हरायै·अभीष्ट· ५
बालिकायै·सिंहवाहिन्यै·शार्ङ्ग·कराम्यै·वसुधाकारायै·चेतनायै·कूपनायय·
क्षितिधरायै·अर्धबिंदुधारिण्यै·धरायै·विश्वमातायै·कुलवस्यै·पद्मवस्यै·प्रद्युम्नायै·
सुचेतनायै·जगद्धात्र्यै·राज्यलक्ष्म्यै·अभीष्टसि· ६ गणेशाय·सप्तमातृभ्यो·
दुर्गायै·क्षेत्राधिपतये·गोर्यै·भक्तवत्सलायै·भक्तिप्रियायै·मधुकैटभना
शिन्यै·शुंभमर्दिन्यै·निशुंभनाशिन्यै·भागवत्यै·भुक्तित्राणदायिन्यै·विश्वपूजि संपू
तायै·अभीष्टसि· ७ महासरस्वत्यै·भुवनेश्वर्यै·दक्षकन्यायै·हिमाचलसुतायै· ३
पार्वत्यै·भद्रकाल्यै·उमायै·चंडिकायै·कालिकायै·आर्यायै·दुर्गायै·भ्रमायै·

Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan Mumbai.

(५A)

विश्वरूपायै धात्र्यै शाकंभर्यै इंद्राण्यै स्तुतिदायिन्यै सारायै रक्तबीजहंत्र्यै अंबिकायै श्रीमहालक्ष्म्यै अभीष्टसि ॥ अथ अष्टोत्तरशतनामपूजा अस्य श्री अष्टोत्तरशतदिव्यनामामृतस्तोत्रमंत्रस्य ब्रह्मा ऋषिः श्रीमहालक्ष्मीर्देवता अनुष्टुप् छंदः श्रीमहालक्ष्मीप्रीत्यर्थे अष्टोत्तरशतपूजने विनियोगः ॐ महालक्ष्म्यै महाकाल्यै महाकन्यायै सरस्वत्यै महागौर्यै महादेव्यै भक्तानुग्रहकारिण्यै स्वप्रकाशरूपिण्यै महामायायै माहेश्वर्यै ॥ वागीश्वर्यै जगद्धात्र्यै कालरात्र्यै त्रिलोचनायै भद्रकाल्यै कराल्यै महागौर्यै त्रिपुलोचन्यै सिद्धलक्ष्म्यै क्रियालक्ष्म्यै मोक्षमार्गप्रदायिन्यै अरूपायै विश्वरूपायै स्वरूपायै विश्वरूपिण्यै ४५ पंचभूतात्मिकायै देव्यै देवमात्रे सुरेश्वर्यै दारिद्र्यध्वंसिन्यै गौर्यै वीणापुस्तकधारिण्यै सर्वशक्त्यै त्रिशक्त्यै ब्रह्मात्मिकायै ४५ शिवात्मिकायै अष्टांगयोगिन्यै हंसिन्यै नवदुर्गायै अष्टभैरव्यै ५ गंगायै सरस्वत्यै वेण्यै सर्वशास्त्रार्थधारिण्यै समुद्रवसनावासिन्यै ब्रह्मांडमणिमेखलायै ॥ अवस्थात्रयदायै मुक्तायै गुणत्रयविवर्जितायै योगध्यानपरायण्यै देवत्र

वाहि

वनमालांसुगंधाढ्यांनानापुष्पैःसमन्वितां पूजार्थंसाधितांदेवी प्रीत्यर्थंप्रतिगृह्यतां
पुष्पमालां॰ ९२

नां

कोजागर विशोकायै॰ वेदांतज्ञानरूपिण्यै॰ पद्मवस्यै॰ विशालाक्ष्यै॰ योगयज्ञोपवीतिन्यै॰ सूर्यचंद्रार्ध
४ मासायै॰ ९८ ग्रहनक्षत्ररूपिण्यै॰ वेदिकायै॰ वेदरूपिण्यै॰ हिरण्यफलसंभवायै॰ कैवल्यप
दव्यै॰ ९९ लेखायै॰ सूर्यमंडलसंस्थितायै॰ शक्तिमंडलसंस्थितायै॰ चक्रिकायै॰ चं
(5) द्रमध्यस्थायै॰ ९९ चक्रमार्गप्रदायिन्यै॰ सर्वसिद्धांतमार्गस्थायै॰ षड्गुणायै॰ वर्णवर्जितायै॰
एकाक्षरप्रदायुक्तायै॰ प्रत्यक्षादिप्रमाणात्मिकायै॰ दुर्गायै॰ अक्षणकुलायै॰ विद्यायै॰
चेतनायै॰ चित्तरंजनायै॰ शब्दब्रह्मात्मिकायै॰ अनंतायै॰ ब्रह्माब्रह्मसनातन्यै॰ चिं
तामण्यै॰ १०० उषादेव्यै॰ छायादेव्यै॰ सरस्वत्यै॰ त्रैलोक्यमोहिन्यै॰ विद्यायै॰ सर्वस
रक्षणप्रदायै॰ ब्रह्मस्थावररूपायै॰ केवलज्ञानगोचरायै॰ कारणायै॰ नारूणाधरायै॰
मधुकैटभमर्दिन्यै॰ अचिंत्यलक्षणायै॰ गोत्रायै॰ सदाभक्ताघनाशिन्यै॰ महालक्ष्मी
परमैश्वर्यै॰ १०१ सिद्धलक्ष्म्यै॰ महाकाल्यै॰ सद्योजातायै॰ अघोरायै॰ महापुरुष तंप्र
रूपिण्यै॰ १०२ प्रसादायै॰ एकाक्षरायै॰ देव्यै॰ योगदायिन्यै॰ श्रीमहालक्ष्म्यै॰ १०३ ४
इत्येतदष्टशतनामपूजां कृपदास्यामि ते देवि गोप्य तेन समन्वितं प्रतिग

कुमहादेवि भक्तानां वरदप्रिये कर्दमेन· धूपं· आज्यंच वर्तिसंयुक्तं· आपःस्रजंतु· दीपं· नैवे
द्यं परमं दिव्यं दृष्टिप्रीतिकरं शुभं भक्ष्यभोज्यादिसंयुक्तं परमान्नाद्यादिसंयुतं आर्द्रांयःकरि
णीं· नैवेद्यं· पूगीफलं महद्दिव्यं नागवल्लीरसंयुतं कर्पूरैलासमायुक्तं तांबूलं प्रतिगृह्यतां
तांबूलं· इदं फलं मया देवस्थापितं पुरतस्तव तेन मे सफलावाप्तिर्भवेज्जन्मनि जन्मनि
(5A) फलं· हिरण्यगर्भगर्भस्थं हेमबीजं विभावसोः अनंतपुण्यफलदमतः शांतिं प्रयच्छ मे
दक्षिणां· नीरांजनं सुमांगल्यं कर्पूरेण समन्वितं चंद्रार्कवह्निसदृशं प्रसादे हि नमो
स्तुते आर्द्रां पुष्करिणीं· नीरांजनं· क्षीरार्णवसुता लक्ष्मी चंद्रमस्य सहोदरी गृ
हाणाचभिमां सर्वादेवि तुभ्यं नमोस्तुते तामआवह मंत्रपुष्पं· श्रीवृक्षस्य दलं देवि
महादेवि प्रियं सदा बिल्वपत्रं प्रयच्छामि पवित्रं ते सुनिर्मलं बिल्वपत्रं· इह जन्मनि
यत्पापं मम जन्मांतरेषु च निवारय महादेवि लक्ष्मीनारायणप्रिये प्रदक्षिणां·
दामोदरी नमस्तेस्तु नमस्त्रैलोक्यनायके हरिकांते नमस्तेस्तु त्राहि मां दुःखसागरात्
नमस्कारः· क्षीरार्णवसमुद्भूते कमले कमलालये प्रयच्छ सर्वकामांश्च विष्णु

(6)

कोजागर वक्षस्थलालये पूजानिवेदनं छत्रं चामरमांदोलमंजनं दर्पणं तथा गीतवादित्रनृत्यै
श्वराजसन्मानतैस्तथा उपचारैः समभ्यर्च क्षमाप्य च महेश्वरीं वरलक्ष्मीमहादे
५ वीं सर्वकामप्रदायिनी इतिप्रार्थना आवाहनं न जानामि न जानामि तवार्चनं पूजां
चैव न जानामि क्षम्यतां परमेश्वरी मंत्रहीनं क्रियाहीनं भक्तिहीनं सुरेश्वर यत्पूजि
तं मया देव परिपूर्णं तदस्तु मे गतं पापं गतं दुःखं गतं दारिद्र्यमेव च आगता सुखसंपत्तिः
पुण्याच्च तव दर्शनात् प्रमादात्कुर्वतां कर्म प्रच्यवेताध्वरेषु यत् स्मरणादेव तद्विष्णोः संपूर्णं
स्यादिति श्रुतिः यस्य स्मृत्या च नामोक्त्या तपःपूजाक्रियादिषु न्यूनं संपूर्णतां याति सद्यो
वंदे तमच्युतं न्यूनमप्यधिकं नापि यन्मया पूजनं कृतं तत्सर्वं क्षम्यतां देवि परिपू
र्णं तदस्तु मे भूमौ स्खलितपादानां भूमिरेवावलंबनं त्वयि जातापराधानां त्वमे रामः
व शरणं मम आत्मा त्वं गिरिजा मतिः सहचराः प्राणाः शरीरं गृहं पूजा ते विषयोप ५
भोगरचना निद्रा समाधिस्थितिः संचारः पदयोः प्रदक्षिणविधिः स्तोत्राणि सर्वा गिरो य
द्यत्कर्म करोमि तत्तदखिलं शंभो तवाराधनं अनेन पूजनेन भगवानाद्यरूपकर्मणा श्रीपरमेश्वरी प्रीयतां
नमः

(6A)

अथ कथा॥ स्कांदे॥ अस्ति कोजागरं नाम व्रतानामुत्तमं व्रतं यत्कृत्वा समवाप्नोति जंतु
र्लोकाननुत्तमान् १ ऋषय ऊचुः कार्तिकस्य उपांगानि व्रतानि कथयं तु नः कृतेषु येषु सव
र्ति संपूर्णं कार्तिकव्रतं २ वालखिल्या ऊचुः आश्विने शुक्लपक्षे तु भवेद्या चैव पौर्णिमा तत्रादौ पूजनं कुर्या
च्छ्रियो जागरपूर्वकं ३ नारिकेलोदकं पीत्वा अक्षैः क्रीडां समारभेत् निशीथे वरदा लक्ष्मीः
को जागर्तीति भाषिणी ४ जगत्सु भ्रमते तस्यां लोकचेष्टावलोकिनी तस्मै वित्तं प्रयच्छामि
यो जागर्ति महीतले ५ सर्वथैव प्रकर्तव्यं भूतं दारिद्र्यभीरुभिः एतद्व्रत प्रभावेन व
लिनो पि धनी भवेत् ६ ऋषय ऊचुः वलिनः कोभ्यनेकोसौ लब्धवान्स कुतो व्रतं एतद्विस्तरतो
ब्रूत वालखिल्याः परंतप ७ वालखिल्या ऊचुः आसीत्पुरा वलितो नाम मागधः कुशसंभवः नानावि
धाप्रवीणोसौ संध्यास्नानपरायणाः ८ याचनं मरणं तुल्यं मन्यते स द्विजोत्तमः गृह
गतं सदा तिमात्यं याचयनेकंचित् ९ तस्य भार्या महाचंडी नित्यं कलहकारिणी
भर्तृगिराः स्वर्णरूप्यालंकारादि विभूषिताः १० नानामाल्यांवरधरा दृश्यादि वांगनाइव

(७)

को॰ कथा अहं दरिद्रस्य गृहे पतिना सिद्धुरात्मनः ११ लज्जामंबाध्यते नित्यं ज्ञातीनां मुखदर्शने
६ धिगस्तु चेन हि भाय निर्धनस्य कुलस्य च १२ एवं च दाविलोकेषु न करोति पतीरितं
संकल्पं कृतवानेकं यद्यद्भर्ता वदिष्यति १३ विपरीतं करिष्यामि यावल्लक्ष्मीः प्रसीदति
भर्तुः पाषाणबुद्धेस्तु चौर्यं कुरुते पालये १४ आनीयतां धनं भूरि नो चेत्सं ताडयाम्यहं
क्षणं रोदति नाश्नाति कदाचिद्दुःखदा इति १५ सा कपालं ताडयति एवं क्लेशयते पतिं
क्षंतातस्यास्तु चरितं या चिंतादुःखभीकिः १६ नो वाच्च वचनं किंचिद्यथाल्पेन तोषितः
एकस्मिन् श्राद्धपक्षे तु द्विजो भूद्द्विजोत्तमः १७ एतस्मिन्नवसरे स्वयं श्राद्धसामग्रिकं गृहे
वर्तते गृहिणी चेष्टं न करिष्यति किंचन १८ एवं स खिन्नमना विप्रो न भाषितं च किंचन
चिंतया विह्वलं तमायये मित्रमुत्तमं १९ नाम्ना गणपतिः ख्यातं तस्मिन्नाभ्यागते सति पत्र
नो वाच पूर्ववद्धृत्तं मित्रं न च न मब्रवीत् २० भो भो बलिनश्चिंतं ते किमर्थं चिंतयान्वितं ६
अवश्यं खभियाद्धत्यां चिंतातो न हियाम्यहं २१ बलिनउवाच अधुना पितृपक्षे तु पितुः श्राद्धं समागतं

(7A)

सामग्रिकं चास्ति गृहे विपरीतकरी प्रिया २२ कथं संपाद्यते श्राद्धं इति चिंतातुरोस्म्यहं गणपतिरुः
धन्योसि कृतकृत्योसि भार्या यस्येदृशी गृहे २३ ब्रूहि त्वं वैपरीत्येन भार्या कार्यं करिष्यति
बलिनस्तु न मे श्रुत्वा सा यं भार्यमभिभाषितं २४ अनर्थकारके चंडी पर श्वः श्राद्धकं पितुः ॥
न स्थापितं धनं यस्मान्मदर्थं तिष्ठ पातके: २५ तस्मात्तु शीघ्रं पाककर्त्वं कुरु दुष्टे करोपि चेत्
ब्राह्मणायेभूतकाराः शौचाचारविवर्जिताः २६ निमंत्र्यास्ते त्वया भद्रे नो न मास्तु कदाचन
इति भर्तृवचः श्रुत्वा संभारस्तु महान्कृतः २७ निमंत्रितास्तु सद्विप्राः कालेपाककृतस्तया
विपरीतेरेकवाक्यैः श्राद्धं संपादितं तया २८ पिंडदानं ततः कृत्वा भार्यां वचनमब्रवीत्
विसर्ज पिंडं नीत्वा त्वं क्षिप गंगाजलेशुभे २९ पिंडं नीत्वा सत्वरं सुक्ताशोऽच कूपे प्रचिक्षिपेत्
तच्छ्रुत्वा बालिनो दुर्बीवभूव कुलितानन: ३० क्रोधाद्धि निर्ययौ गेहात्स संकल्पं कृतवान्निति
लक्ष्मीर्यदि प्रसन्ना स्यात्तदा त्यक्ष्याम्यहं ३१ इति संकल्प सो विप्रो गृहे नेनि र्जने वने
एको धर्मनदीतीरे वृक्षवल्कलधारकः ३२ त्रिंशद्दिनानि निवसद्दाग तत्र त्वेच पौर्णिमा

को.क. कालीवंशास मुद्भूता नामकन्याः सुलोचनाः ४२ निवसंति वनेतस्मिन्न तत्र चक्रेऽभिवासये ॥
७ खेलीकृतं तु सुधर्यागृहं चंद्रप्रभोपमं ४३ मंडलानि विचित्राणि नानापिष्टैः कृतानि च ॥
स्थापयित्वा सदिराभूजा कृतानाभिः प्रयत्नतः ४४ एवं तु प्रथमो यामो बालाभिनर्तनए वाहि ॥
प्रारब्धं च ततो घृतं तुर्यतालनले गिरे ४५ चातुर्भिस्तु चिनाक्षाणां क्रीडनं नैव जायते ॥
तस्मान्मग्य स्तुरीयस्तु विचार्यैवं विनिर्गता ४६ कन्येकानुनदीतीरे ददर्श बलितं द्विजं ॥
तानं साधु चरितं साचितं च मुखवाकृतं ४७ भाचवचनं चारु द्विजकोऽसि समागतः ॥
याद्युतप्रक्रीडितं घृतं लक्ष्मीप्रीतिकरं परं ४८ संतरचनं श्रुत्वा बलितो वाक्यमब्रवीत् बलितउ.
घृतेन क्षीयते लक्ष्मी घृताद्धर्मो विनश्यति ४९ मुधावदूदसा किं त्वं कथं लक्ष्मीः प्रसीदति
कन्याउ. भाषसे त्वं पंडितवत्कर्मतोऽसि नमूर्खवत् ५० दिवस्य शरत्कृ पूर्णायां घृतेन लक्ष्मीः प्रसीदति रामू.
घृतक्रीडां तु कृत्वैव कोलुकं पश्य चेंदिरे ५१ इत्सका सौलयानी ताक्रीडार्थं स्वयमंदिरे ७
दत्वा तस्मै नारिकेलं जलं भक्ष्यादिकं तया ५२ आरब्धं च ततो घृतं श्रीलक्ष्मीप्रियता मिति

Project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

(8A)

लापिनी चिररत्नानि कन्याभिर्ब्राह्मणेन तु ॥४६॥ कौपीनं लापितं स्वीयं ताभिर्निर्जितमेव तत्
ब्राह्मणः क्रोधसंयुक्तो किं कर्तव्यं मयाधुना ॥४७॥ उपवीतं लापयित्वा ततः स्वीयं कलेवरं ॥
लापयित्वे वनि श्चितम् उपवीतं ल लापसः ॥४८॥ ताभिर्जितं च तद्पि शरीरं लापितं स्वकं ॥
ततो दुःखात्रे संजाते लक्ष्मीनारायणावुभौ ॥४९॥ आगतौ लोककृचरितं द्रष्टुं विप्रदर्शसः ॥
उपवीतं तु कौपीनं चिंतयानि कृशीकृतं ॥५०॥ उवाच वचनं विष्णुः शृणु वत्सं पद्मलोचने
तव व्रतकरं विप्रं कथं जातं स चिंतकं ॥५१॥ समादेनं कुरुक्षिप्रं लक्ष्मीयं तं सुखोचितं
इति विष्णुवचः श्रुत्वा पद्मयासौ कृपान्वितः ॥५२॥ बाला चित्तहरो जातस्तत्काले मदनोपमः
ततः कामेन संसिद्धा तास्तु या नागकन्यकाः ॥५३॥ विप्राय वचनं प्रोचुः शृणु विप्र तपोधनाः
अधस्माभिर्जितस्त्वं चेद् द्वौ सम्यक् च वचो नु गः ॥५४॥ वयं त्वया निर्जिताश्चेद् यथेच्छसि तथा कुरु
इति तद्वचनं श्रुत्वा तथामेने स च द्विजः ॥५५॥ क्रीडयाता जिताः कन्या गांधर्वेणाविवाहिताः
तासां रत्नानि नाम्ना भिर्गृहीतानि महं मये ॥५६॥ प्रासंचंडी निस्सकारान्मये दं भाग्यमुत्तमं

" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai. "

(९)

कोजा. तस्मात्त्वमानिता चंडी सापि प्रीता बभूव ह ५५ चकार स्वामिनश्चा तां दृष्ट्वा लक्ष्मीव्रतं स्त्रियः
८ बह्वाश्चिन्याश्विनीया सात्र पूर्णा विशिष्यते ५६ तत्राराध्य महालक्ष्मीमीदृक्षे रात्र यत्नतस्थितां
उपवासं प्रकुर्वीत दीपान्दद्याश्च शक्तितः ५७ लक्षं तदर्धमयुतं सहस्रं शतमेव च
घृतेन दीपये द्दीपान् तिलतैलेन वा व्रती ५८ रात्रौ जागरणं कुर्यान्नृत्यगीतपुरःसरं
यथाविभवतो देया पुरो वीथिषु दीपकाः ५९ देवतायतने चैव आरामेषु गृहेषु च ॥
ततः प्रभाते सुस्नातः संपूज्य च यथाक्रतु ६० ब्राह्मणान्भोजयेत्क्षीरघृतशर्करपायसैः
वासोभिर्दक्षिणाभिश्च सवस्त्रान्पूजयेद्द्विजान् ६१ यथाशक्तिश्च दातव्या दीपाः स्वर्णविनिर्मिताः
एवं विधिर्विनिर्दिष्टस्ततः पारणमाचरेत् ६२ अस्याश्च प्रभावेन सकलासंख्यानसे ध्रुवं
अप्सरोभिः परिवृतो स्वर्गलोके महीयते ६३ इह भाग्यमारोग्यं पुत्रपौत्रादिसंपदः एवं
लक्ष्मीव्रतं कृत्वा न दरिद्रो न दुःखभाक् ६४ कथां श्रुत्वा विधानेन व्रतस्य सफलं लभेत् इति राम
।कथा।। सनत्कुमारसंहितायां कोजागरव्रतं संपूर्णं शुभं भवे आश्विनशुद्धैकादशी सदाशिवेन लिखितं ८

Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

## मूळ प्रत पाहण्यासाठी संपर्क

**इतिहासाचार्य वि.का. राजवाडे संशोधन मंडळ, धुळे**
राजवाडे पथ, गल्ली नं. १, धुळे-४२४००१ (महाराष्ट्र)
**दूरध्वनी क्रमांक** (०२५६२) २३३८४८
**Email ID** : rajwademandaldhule@gmail.com